# Advaitopanishad

# અદ્વૈતોપનિષત્

## Document Information

Text title : advaitopaniShat

File name : advaitopaniShat.itx

Category : upanishhat, vedanta

Location : doc_upanishhat

Proofread by : Sunder Hattangadi Radim Navyan radimnavyan at gmail.com

Description-comments : aprakAshitA upaniShadaH

Latest update : October 20, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# અદ્વૈતોપનિષત્

ૐ અદ્વૈતપુરુષસ્ય ન દ્વિતીયો ભેદોઽસ્તિ । સ્થિરજઙ્ગમમધ્યે અદ્વૈતં બ્રહ્મ પ્રકાશિતમ્ । સર્વલોકમધ્યે બ્રહ્મ દ્વિધારૂપં વિચરતિ । ચૈતન્યચિત્તેજસઃ અન્તરાત્મા । મધ્યે કૈવલ્યાત્મા । એકૈકં યથા રવિતેજઃ રવિર્ભવેત્ તથા અખણ્ડિતબ્રહ્મ માયાજગત્રયં અવસ્થાત્રયં પરમાત્મનઃ એકં ભવતિ । યા બુદ્ધિર્ગર્ભમધ્યે સા બુદ્ધિર્બાલ્યાવસ્થા ન ભવતિ । યા બુદ્ધિર્બાલ્યાવસ્થા ભવતિ સા બુદ્ધિર્યૌવનાવસ્થા ન ભવતિ । યા બુદ્ધિર્યૌવનાવસ્થા સા બુદ્ધિર્યૂનાવસ્થા ન ભવતિ । જરાવસ્થા કાલસમ્પ્રીકામેવધર્મક્ક્રીયતે (?) કારણં તત્ત્વજ્ઞાનં ભવતિ । જ્ઞાનપ્રબોધો યસ્મિન્મધ્યે માયામોહં પરિત્યજ્ય સર્વકર્મવિનિર્મુક્તઃ સ શબ્દાતીતોઽપિ જાયતે । અથેતોઽપિ અદ્વૈતપુરુષસ્ય પૂર્ણં બ્રહ્મ પ્રતિભાસિતમ્ । યથા નદી જાયતે સાગર એકોઽપિ સાગરપ્રતિભાસિતઃ તથા બ્રહ્મ સર્વાન્તરાત્મા મધ્યે પ્રકાશિતમ્ । નાપ્રસં સમ્પુટં (?) સત્ત્વરજસ્તમોગુણરહિતં તત્ત્વં ચેતિ । યથા યોગી વાયુનિરોધનં ઉક્તાચરણગુરુરાછિનોતિ કિલ્બિષમ્ । સર્વદિવ્યદેહમધ્યે પરમાત્મા પ્રકાશિતઃ વિનિર્મુક્તભવસાગરઃ સ્વર્ગે દેવમધ્યે ઉત્તમસ્વલ્પસ્ય બુદ્ધિપ્રકાશઃ અસ્મિન્મધ્યે માયામોહં પરિત્યજેત્ । પ્રકાશમધ્યે માયા કરોતિ । તૈલમધ્યે યથા યથા મક્ષિકા એકદેહિમધ્યે બ્રહ્મ દશધા રૂપં વિચરતિ । ચક્ષુઃપ્રાણમનોબુદ્ધિપઞ્ચેન્દ્રિયાણિ પઞ્ચતત્ત્વાનિ તથા ઘટઘટમધ્યે બહુચન્દ્રોઽપિ દૃશ્યતે પ્રકાશિતઃ સર્વલોકમધ્યે બ્રહ્મણો રૂપં વિચરતિ તથા ઘટઘટમધ્યે બહુચન્દ્રોઽપિ દૃશ્યતે । અદ્વૈતં કથિતં યેન પુરુષોઽમૂઢો ભવતિ । દેવાસુરમુનિમનુષ્યાણાં અધઃ ઊર્ધ્વં ચતુર્દિશમ્ । ભુવર્ણાયુદેવાદાવ્યદેહિતેરસકારો દૃશ્યતે રસકારાકારમધ્યે ભવતિ નિરાકારઃ અકારઉકારમધ્યે બ્રહ્મ પરિપૂર્ણં સત્યસત્યં વેદવાક્યં વેદશાસ્ત્રપ્રતિભાસિતં કૈવલ્યં દ્વૈતાદ્વૈતરહિતં

મનોમય આનન્દમયતત્ત્વમયતેજોમયસર્વમયઃ વિષ્ણુવૃક્ષફલં ઉત્પન્નં પરમહંસપૂર્ણોઽપિ જાયતે । જ્ઞાનં માતા વિજ્ઞાનં પિતા સગુણબ્રહ્મ નિર્ગુણબ્રહ્માર્પિતં અષ્ટમી ચ નિર્ગુણાવસ્થા બ્રહ્મ શરીરજ્ઞાનલહરી બ્રહ્મણઃ । બ્રહ્મણો યજ્ઞોપવીતમનિષ્ટં ગમ્ભીરગ્રહે ક્ષેમસર્વવૈરાગ્યપ્રભાવેન સન્તોષલાભસમસ્તગુણોઽપિ જાયતે । પરમહંસપુરુષસ્ય દ્વિતીયં ભેદં યથા જલરહિતે ભિન્નં પ્રાણપ્રીતેયન્ (?) । દ્વિતીયવસ્તુરહિતઃ અખણ્ડિતં વસ્તુ મધ્યે પ્રવિષ્ટં અર્ધસ્થાને અર્ધમૃચસ્થાને આત્મા દૃશ્યતે આત્મવ્યાપકં બ્રહ્મજ્ઞાનવિજ્ઞાનમ્ ॥

ઇતિ અદ્વૈતોપનિષત્ સમ્પૂર્ણા ।

Proofread by Sunder Hattangadi,
Radim Navyan radimnavyan at gmail.com

---

*Advaitopanishad*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*